कर्कशत्वक्का शूलनिस्तोदपीड़िता। चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः। सदाहं प्रकिरत्यस्रं यस्याः सा लोहितक्षरा६। सवातमुद्गिरेद्बीजं वामिनी ७रजसा युतम्। प्रस्रंसिनी८स्यन्दते तु क्षोभिता दुःप्रसूश्च या। स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी९ रक्तसंस्रवात्। अत्यर्थं पित्तला१० योनिर्दाहपाकज्वरान्विता। चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्। अत्यानन्दा११ न सन्तोषं ग्राम्यधर्मेण गच्छति। कर्णिन्यां१२ कर्णिका योनौ श्लेष्मासृग्भ्यान्तु जायते। मैथुनाचरणात् पूर्वा १२ पुरुषादतिरिच्यते। बहुशश्चातिचरणादन्या१४ वीजं न विन्दति। श्लेष्मला१५ पिच्छिला योनिः कण्डूयुक्तातिशीतला। चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत्। अनार्त्तवस्तना षण्ढी १६ खरस्पर्शा च मैथुने। अतिकायगृहीतायास्तरुण्याः फलिनी१७ भवेत्। विवृता महती१८योनिः सूचीवक्त्रा१९ऽतिसंवृता। सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा २०। चतसृष्वपि चाद्यासु सर्वलिङ्गोच्छ्रितिर्भवेत्"।

४२२९ पृ०पिष्टपचनशब्दात् परत्र परिशिष्टम्

**पिष्टपशु** पु० पिष्टमयः पशुः। यज्ञे पशुस्थाने पिष्टमये पशौ तथा हि पिष्टपशुमीमांसायाम् अनिष्टसाधनस्यापि हिंसाया वैदिकमन्त्रद्वारा संस्कारविशेषे जनिते इष्टसाधनत्वं यथा विषादेरनिष्टसाधनस्यापि वैद्योक्तसंस्कारभेदे कृते इष्टसाधनत्वम्। एवञ्च वैद्योक्तविषसंस्कारस्य किञ्चिद्वैगुण्ये यथा नेष्टसाधनत्वमेवं वैदिकप्रयोगे मन्त्रादीनां यथोक्तस्वरादिवैगुण्येऽपि न हिंसाया इष्टसाधनत्वम्। विशेषतः सांख्यमते हिंसाया इष्टसाधनत्वेऽपि अनिष्टान्तरसाधनत्वमुररीकृतम्। तथा च वेदोच्चारणादौ सामर्थ्यहीनानामिदानीन्तनानां सुतरां पशुयागादौ पिष्टपशुनैव यागो विधेयः न तु साक्षात् पशुनेति व्यवस्थापितम्। मनुनापि"कुर्य्यात् घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा इत्यनेन कामनाद्युपासक्तौ पिष्टपशोरेव विधानमुक्तम्। एतन्न्यायानुसारेणैव भा०आश्व०९१अ०"आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ। महर्षयो महाराज! बभूवुः कृपयान्विताः। ततो दीनान् पशून् दृष्ट्वा ऋषयस्ते तपोधनाः। ऊचुः शक्रं समागम्य नायं यज्ञविधिः शुभः। अपरिज्ञानमेतत्ते महान्तं धर्ममिच्छतः। न हि यज्ञे पशुगणा विधिदृष्टाः पुरन्दर!। धर्मोपघातकस्त्वेष समारम्भस्तव प्रभो!। नायं धर्मकृतो यज्ञो न हिंसा धर्म उच्यते। आगमेनैव ते यज्ञं कुर्वन्तु यदि चेच्छसि। विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान् भवेत्। यज वीजैः सहस्राक्ष! त्रिवर्षपरमोषितैः। एष धर्मो महान् शक्र! महागुणफलोदयः"।

४२९२ पृष्ठस्थपुष्यस्नानशब्दात् परत्र परिशिष्टम्।

**पुष्यानुग** न० चक्रदत्तोक्ते चूर्णभेदे "अम्बष्ठकीमोचरसौ समङ्गापद्मकेशरान्। वाह्लीकातिविषामुस्तं विल्वं लोध्रं सगैरिकम्। कट्फलं मरिचं शुण्ठीं मृद्वीकां रक्तचन्दनम्। कट्वङ्गवत्सकानन्ताधातकीमधुकार्जुनम्। पुष्येणोद्धृत्य तुल्यानि सूक्ष्मचूर्णानि कारयेत्। तानि क्षौद्रेण संयुज्य पाययेत् तण्डुलाम्बुना। असृग्दरातिसारेषु रक्तं यच्चोपवेश्यते। दोषागन्तुकृता ये च वालानां तांश्च नाशयेत्। योनिदोषं रजोदोषं श्वेतं नीलं सपीतकम्। स्त्रीणां श्यावारुणं यच्च तत् प्रसह्य निवर्त्तयेत्। चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम्"।

४४२७पृ० प्रकृतिशब्दस्य परिशिष्टम्

राज्ञां पुरोहितादिषु२१ दशसु सुमन्त्रादिषु२२ अष्टासु च यथोक्तं शुक्रनीतिशास्त्रपरिशिष्टे

"पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा। मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः। अमात्यो दूत इत्येता राज्ञः प्रकृतयो दश। दशमांशाधिकाः पूर्वा दूतान्ताः क्रमशः स्मृताः। अष्टप्रकृतिभिर्युक्तो नृपः कैश्चित् स्मृतः सदा। सुमन्त्रः पण्डितो मन्त्री प्रधानः सचिवस्तथा। अमात्यः प्राड्विवाकश्च तथा प्रतिनिधिः स्मृतः। एताभृतिसमास्त्वष्टौ राज्ञः प्रकृतयः सदा"। एतेषां लक्षणानि तत्रैवोक्तानि दृश्यानि विस्तरभयान्नोक्तानि।

४४३१ पृष्ठस्थप्रगल्भशब्दात् पूर्वत्र परिशिष्टम्

**प्रगदिन्** त्रि० प्रगदति वा० शीलार्थे इनि। प्रकर्षेण कथनशीले स्त्रियां ङीप् ततः प्रगद्या० चतुरर्थ्यां ञ्य। प्रागद्य तददूरदेशादौ त्रि०।

**प्रगद्यादि** पु० चतुरर्थ्यां ञ्यप्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रगदिन् मगदिन् मगदिन् कविल खण्डित गदित चूड़ार मड़ार मन्दार कोविदार"

४४९९पृष्ठस्थप्रसाधनशब्दस्य परिशिष्टम्

प्रसाधनीकरणप्रकारस्य युक्तिकल्पतरावुक्तो यथा

"प्रसाधनी दिङ्नवनागसप्तसंख्याभिरुक्ताङ्गुलिभिः क्रमेण। चतुर्विधानां पृथिवीपतीनां सम्पत्तिसौभाग्ययशःसमृद्धिदा। काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम्। जाङ्गलानूपसामान्यदेशजानां महीभुजाम्।